नं० ५९५५

नं २९४३क
[illegible]

~~#~~ 6032

F – 16

Complete

[illegible]

श्री

१८

16

ना

णस्वदे

ण ब्रह्मरं

नीजीवा

सहि [illegible] ावक्कादिषु

वन [illegible] दयवा

कु

प्रा

ॐश्रीगुरवेशिवायसांविकायैनमः श्री
रस्तु श्रीभैरवाउवाच अधुनापद्धतिंव
क्ष्येश्रीविद्यार्चनसंयुताम् गद्यपद्यमयी
गोप्यां सकलागमनिश्चिताम् प्रातःकृत्य
मकृत्वानुयोदेवींभक्तितोर्चयेत् तस्यपू
जानुविफला सोचहीनायथाक्रिया तत्र
श्रीमान्साधकोब्राह्मेमुहूर्ते शयनतलादु
त्थाय करचरणमुखानिप्रक्षाल्याचम्य नि
जासने समुपविश्य निजशिरसि श्वेतव
र्णाधोमुखसहस्रदलकमलकर्णिकांतर्ग
त चंद्रमंडलसिंहासनोपरि निषण्णं स्व
गुरुं शुक्लवर्णं शुक्लालंकारभूषितं सा
नानंदमुदितमानसं सच्चिदानंदविग्रहं
त्रिनयनं चतुर्भुजं ज्ञानमुद्रापुस्तकवरा
भयकरं वामांगेवामहस्तधृतकमलया
रक्तवसनाभरणयास्वप्रियया दक्षभुजे
नालिंगितं सर्वदेवानाधिदेवं सर्वती
र्थतीर्थं परमशिवस्वरूपं शांतंस्वप्रस
न्नंध्यात्वा तच्चरणकमलयुगलविग
लदमृतधारया स्वात्मानंप्लुतंविभाव्य
मानसोपचारैराराधयेत् वं लंपृथिव्या
त्मकंगंधंश्रीगुरुपादुकायैसमर्पयामिन
मः वं हंआकाशात्मकंपुष्पंश्रीगुरुपादुका
यैसमर्पयामिनमः वं यंवाय्वात्मकंधूपं
श्रीगुरुपादुकायैसमर्पयामिनमः वं रंव

रूपात्मकं दीपं श्रीगुरुपादुकायै समर्पया
मिनमः वं वंअमृतात्मकं नानानैवेद्यं श्री
गुरुपादुकायै समर्पयामिनमः वं सं सर्वात्मकं
पलमलुतांबूलादिकं श्रीगुरुपादुकायै स
मर्पयामिनमः ओंऐंह्रींश्रीं हसखफ्रें हसर
क्षमलवयऊं सहखफ्रें सहक्षमलवरयऊं
ह्सौः स्हौः श्रीमच्छ्री स्वामिप्रतापकौला
नंदनाथश्रीपादुकांपूजयामिनमः इति
दशधाविमृश्य मनसादंडवत्प्रणामेत्
प्रणाममंत्रायथा ओंसहस्रदलपंकजे स
कलशीतरश्मिप्रभं वराभयकरांबुजं विम
लगंधपुष्पांबरं प्रसन्नवदनेक्षणं सकल
देवतारूपिणं स्मरेशिरसिहंसगं तदभिधान
पूर्वगुरुं नमामिसद्गुरुंशांतंप्रत्यक्षं शिवरू
पिणं शिरसायोगपीठस्थं मुक्तिकामार्थसि
द्धये श्रीगुरुंपरमानंदं वंदेआनंदविग्रहं
यस्यसान्निध्यमात्रेण चिदानंदायतेपरं अ
खंडमंडलाकारं व्याप्तंयेनचराचरं तत्पदं
दर्शितंयेनतस्मैश्रीगुरवेनमः अज्ञाना
तिमिरांधस्य ज्ञानांजनशलाकया चक्षु
रुन्मीलितंयेन तस्मैश्रीगुरवेनमः नमस्ते
नाथभगवञ्शिवायगुरुरूपिणे विद्यावता
रसंसिद्ध्यै स्वीकृतानेकविग्रह नवाय न
वरूपाय परमार्थैकरूपिणे सर्वाज्ञानत

मोभेद भानवेविहृनायते स्वतंत्रायदया
कृत्तविग्रहायपरात्मने परतंत्रायभक्तानां
भव्यानांभव्यरूपिणे विवेकिनांविवेकाय
विमर्शायविमर्शिनां प्रकाशिनांप्रकाशाय
ज्ञानिनांज्ञानरूपिणे पुरस्तात्पार्श्वयोः पृष्ठे
नमस्कुर्यामुपर्यधः सदामच्चित्तरूपेण वि
धेहिभवदासनं इतिश्रीगुरुंप्रणम्य सुप्रस
न्नंविभाव्य मनसानंदाज्ञांगृहीत्वा मूलाधा
रे स्वर्णवर्णचतुर्दलकमलकर्णिकांतगत
श्रृंगाटकांतर्गतत्रिकोणचक्रपीठेपरिप
र्णं शक्तिंकुंडलिनीमुद्यद्दिनकरसहस्रभा
स्वरां विद्युत्कोटिसन्निभांपंचाशद्वर्णवि
ग्रहामष्टात्रिंशत्कलारूपिणीं सभूतलमं
त्रमातरं त्रिधामधामानंसर्पाकारामूर्ध्वमुखीं
सर्वप्राणिजीवं सार्धत्रिवलयां विसतंतु
तनीयसीं सुप्तांविभाव्य श्रीगुरूपदिष्टमा
र्गेणनिजसहजनादेनसचेतन्यांविधाय
तत्रचतुर्षुदलेषु वंनमः शंनमः षंनमः सं
नमः इतिपत्रेषुमध्येमूलेनचप्रादक्षिण्ये
नप्रपूज्य हंसइतिमंत्रेणसर्वत्रोत्थाप्य त
तः स्वाधिष्ठानेलिंगमूलेविद्रुमवर्णे षड्
दलकमलेतांनीत्वा तत्र बंनमः भंनमः मंन
मः यंनमः रंनमः लंनमः इतिपत्रेषुमध्येमू
ले चप्रपूज्य ततोमणिपूरकेनाभौ नील

वर्णे द्दशदलकमले तांनीत्वा तत्र डं नमः ढं न
मः णं नमः तं नमः थं नमः दं नमः धं नमः नं न
मः पं नमः फं नमः इति पत्रेषु मध्ये मूलेन च सं
२ पूज्य ततो वक्षस्यनाहते पिंगलवर्णे द्वादशक
क[illegible]नीत्वा तत्र कं नमः खं नमः गं नमः घं
५ नमः ङं नमः चं नमः छं नमः जं नमः झं नमः
ञं नमः टं नमः ठं नमः इति पत्रेषु मध्ये मूलेन
च सं पूज्य ततो विशुद्धौ कंठे धूम्रवर्णे षोड
शदलकमले तां नीत्वा तत्र अं नमः आं नमः
इं नमः ईं नमः उं नमः ऊं नमः ऋं नमः ॠं न
मः लृं नमः ॡं नमः एं नमः ऐं नमः ओं नमः औं न
मः अं नमः अः नमः इति पत्रेषु मध्ये मूलेन च
संपूज्य ततो भ्रूमध्ये आज्ञाचक्रे विद्युद्वर्णे द्विद
लकमले तां नीत्वा तत्र हं नमः क्षं नमः इति पत्र
योः मध्ये मूलेन च संपूज्य ततो ब्रह्मरंध्रगतस
हस्रदलकमलकर्णिकांतर्गत बिंदुरूपतेजोम
यपरमशिवेन सहैकत्वं नीत्वा ततः स्रवनापरमा
मृतेन तां संतर्प्य तत्रनादस्रवणानन्तरो मुहूर्त्तं
[illegible]यं विभाव्य ततोऽवरोहे सर्वत्र सोहमिति मंत्रे
णाक्रमव्युत्क्रमत्र अवरोहमाणामाज्ञाचक्रा
दिक्रमेण तेषु तेषु कमलेषु तैस्तैरक्षरैः संपूज्य
मानां ततश्च्युतां तत्तद्वर्णं तत्तद्धिदेवताः संतर्प
यंती मूलाधारं प्रापय्य तत्रैव स्वस्थाने स्थाप श्री
येदित्यारोहावरोहक्रमेण परां शक्तिं कुंडलि २
नीं ध्यात्वा ओं प्रकाशमानां प्रथमे प्रयाणे प्रति

प्रयाणोप्यमस्तायमानां अंतः पद्व्यामनुसंचरं
तीमानंदरूपामबलांप्रपद्ये इतिध्यात्वा ॐनाहम
स्मिनचान्योस्तिध्येयंचात्रनविद्यते आनंदपरसं
लीनं ममः समरसीगतं अहंदेवीनचान्यो
स्मि ब्रह्मैवाहंनशोकभाक् सच्चिदानंदरूपाहं
स्वात्मानमितिचिंतयेत् इतिसंस्मृत्य मूलाधा
रेवन्हिमंडलेदशकलात्मकंविभाव्य तत्रमूल
विद्यायाः प्रथमकूटंवाग्भवाख्यस्फुरत्तडित्व
ताभास्वरमनाहतपर्यंतप्राप्तनादशिखंविभा
व्य अनाहते सूर्यमंडलेदशकलात्मकंध्या
त्वा तन्मध्येमूलविद्यायाः कामराजाख्यंद्विती
यकूटं सुधादित्यसंकाशमाज्ञाचक्रपर्यंत
प्राप्तनादशिखमधऊर्ध्वप्रसृत्वरश्मिकंध्या
त्वा आज्ञाचक्रेसोममंडलेषोडशकलात्मकं
विभाव्य तन्मध्येमूलविद्यायाः शक्तिकूटा
ख्यं तृतीयखंडं शशिप्रभंप्रसृत्वरंप्रांतर्गतवि
धूर्ध्वमंडलपर्यंतप्राप्तनादशिखंध्यात्वा
ततोमूलादिब्रह्मरंध्रांतंमूलविद्यांसुधादि
नकरसहस्रभास्वरां तेजोमयीमखंडांध्यात्वा
तत्तेजसाव्याप्तंस्वदेहंविचिंत्य तत्तेजसापरि
णतांश्रीविद्यांपरदेवतांस्वहृदयकमलेसा
भेदेनध्यात्वा मानसोपचारैः संपूज्य प्राणा
यामऋष्यादिस्मरणंविदधीतयथा तत्रादौ
श्रीमहागणपतेः ॐइडयापिबषोडशभिः
पवनं कुरुषष्टिचतुष्टयमंतरगं स्वजपिंगल

पाशनकैः शनकैः दशभिर्दशभिर्दशभिर्द्धधि
कैः ॐअस्यश्रीमहागणपतिमंत्रस्य श्रीब्रह्म
ऋषिः गायत्रंछंदः श्रीमहागणपतिर्देवता
३ गंबीजं ह्रींशक्तिः नमः कीलकं ममचतुर्वर्गफ
लप्राप्त्यर्थेगणपतिप्रसादसिद्ध्यर्थेजपेविनि
3 योगः इतिकृतांजलिः स्मृत्वान्यसेत् श्रीब्रह्म
ऋषयेनमः शिरसि गायत्रीछंदसेनमोमुखे
श्रीमहागणपतिदेवतायेनमः हृदि गंबीजा
यनमः गुह्ये ह्रींशक्तयेनमः पादयोः नमः की
लकायनमोनाभौ ममश्रीगणपतिप्रसादसि
द्ध्यर्थेजपेविनियोगः सर्वांगेषु गामित्यादि
करषडंगन्यासो ततः स्वहृदयकमलेश्रीम
हागणपतिंध्यायेद्यथा ॐगजवदनमचिंत्यं
तीक्ष्णदंतं त्रिनेत्रं बृहदुदरमनंतं दंतमाले
दधानं परशुचषकपद्महृद्धहस्तारविंदं हरि
युगलनिविष्टं श्रीगणेशंभजामि इतिध्यात्वा
मानसोपचारैराराध्य मालामादाययथाश
क्तितयाजपंविधाय पुनरपिप्राणायामऋष्या
दिकरषडंगन्यासान्विधाय ॐगुह्यातिगुह्यगो
प्ता त्वं गृहाणास्मत्कृतंजपं सिद्धिर्भवतु
मेदेवत्वत्प्रसादाद्विनायक इतितेजोमयंजप
फलदेवताद्क्षहस्तेसमर्प्य योनिमुद्रयाप्रण श्री
मेत् ततःश्रीभैरवमंत्रेणप्राणायामंविधाय ३
अस्यश्रीकामेश्वरभैरवमंत्रस्य श्रीदक्षि॰
णामूर्तिऋषिः पंक्तिःछंदः श्रीकामे

श्वरोदेवता श्रींबीजं ह्रींशक्तिः क्लींकील
कं ममश्रीविद्यामंत्रसिद्ध्यर्थेजपेविनियो
गः इतिकृतांजलिः स्पृत्वान्यसेत् श्रीदक्षि
णामूर्त्तिऋषयेनमः शिरसि पंक्तिछंदसेन
मोमुखे श्रीकामेश्वरभैरवदेवतायेनमो हृ
दि श्रींबीजायनमः गुह्ये ह्रींशक्तयेनमः पाद
योः क्लींकीलकायनमः नाभौ ममश्रीविद्या
मंत्रसिद्ध्यर्थेजपेविनियोगः सर्वांगेषु ऐंअंगु
ष्ठाभ्यांनमः क्लींतर्जनीभ्यांस्वाहा सौंः मध्यमा
भ्यांवषट् ऐंअनामिकाभ्यांहुं क्लींकनिष्ठिका
भ्यांवौषट् सौंकरतलकरपृष्ठाभ्यांफट् ऐंहृ
दयायनमः क्लींशिरसेस्वाहा सौंशिखायैव
षट् ऐंकवचायहुं क्लींनेत्रत्रयायवौषट् सौंः
अस्त्रायफट् ततःस्वहृदयकमलेस्वाभैरे
न्श्रीपरभैरवंध्यायेद्यथा ॐसूर्यकोटिसमा
नाभंचंद्रमौलिंत्रिलोचनं पाशांकुशधनु
र्बाणान्धारयंतंशिवंभजे इतिध्यात्वा मानसो
पचारैराराध्यपुनरपिप्राणायामऋष्यादिकर
षडंगन्यासान्विधाय गुह्यातिगुह्यगोप्तात्वं
गृहाणास्मत्कृतंजपं सिद्धिर्भवतुमेदेवत्वत्प्र
सादान्महेश्वर इतियोनिमुद्रयातेजोमयंजप
फलंदेवनादृतहस्तेसमर्प्यप्रणाम्यच ॐअस्य
श्रीमहात्रिपुरसुंदरीमंत्रराजस्य श्रीदक्षिण
मूर्त्ति ऋषिःपंक्तिछंदः श्रीमहात्रिपुरसुं
दरीभगवतीदेवता ऐंप्रथमकूटंबीजं सौंःतती

यकूटं शक्तिः क्लीं द्वितीयं कीलकं ममश्री
चतुर्वर्गसिद्धये जपे विनियोगः इति कृतां
जलिः स्पृत्वान्यसेत् श्रीदक्षिणामूर्त्तिऋ
षये नमः शिरसि पंक्तिच्छंदसे नमो मुखे श्री
महात्रिपुरसुंदरीदेवतायै नमः हृदये प्रथम
कूटं बीजाय नमः गुह्ये सौः तृतीयं शक्तये न
मः पादयोः क्लीं द्वितीयं कीलकाय नमः ना
भौ ममश्रीचतुर्वर्गसिद्ध्यर्थे जपे विनियोगः
सर्वांगेषु ऐं प्रथमं अंगुष्ठाभ्यां नमः क्लीं द्वि
तीयं तर्जनीभ्यां स्वाहा सौः तृतीयं मध्यमा
भ्यां वषट् ऐं प्रथमं अनामिकाभ्यां हुं क्लीं द्वि
तीयं कनिष्ठिकाभ्यां वौषट् सौः तृतीयं करत
लपृष्ठाभ्यां फट् इति करन्यासः अथ षडंगः
ऐं प्रथमं हृदयाय नमः १ क्लीं द्वितीयं शिरसे
स्वाहा सौः तृतीयं शिखायै वषट् ऐं प्रथ
मं कवचाय हुं क्लीं द्वितीयं नेत्रत्रयाय वौषट्
सौः तृतीयं अस्त्राय फट् ततः स्वहृदयक
मले स्वाभेदेन श्रीदेवीं ध्यायेद्यथा ॐउत्तसहे
मरुचिरं रविचंद्रवह्नि नेत्रां धनुःशरयुतां
कुशकामपाशान् रम्यैर्भुजैश्च दधतीं शिवश
क्तिरूपां कामेश्वरीं हृदि भजामि धृतेंदुलेखाम्
इति ध्यात्वा मानसोपचारैः संपूज्य मंत्रसं
स्कारं कुर्यात् तत्रादौ उत्कीलनं सकलह्रीं ऐं
इति त्रिर्जपेत् ह्रीं ह्रीं ह्रीं हसकलह्रीं सकलह्रीं
सकलह्रीं इति संजीवनं त्रिः तं मूलं पं रं धं

तं इति नौरित्त्वं त्रिः ऐं सौः क्लीं ह्रूं शापं मोचय
मोचय फट् स्वाहा इति दशधा शापहारिविद्यां
ऐं सौः श्रीं ह्रीं क्लीं ओं ह्रीं श्रीं कुरुकुल्लायै स्वाहा इ
ति कुरुकुल्लां दशधा ऐं क्लीं ह्रीं त्रिपुरेशि भग
वति स्वाहा इति कुल्लुकां मूर्ध्नि दशधा ओं इति
सेतुं दशधा ह्सौः ह्रीं इति महासेतुं दशधा विशु
द्धौ ओं अं मूलं ऐं अं ५ इति मणिपूरे निर्वाणं
दशधा प्रथमं नमस्त्रिपुराख्याय हृ हृ हृदुरितं
द्वितीयं हन हन कीलान् तृतीयं त्रैपुरि स्वाहा
इत्यस्त्वमंत्रं त्रिः ततः श्रीषोडशीं दशधा ऐं प्र
थमं त्रिपुरदेवि विद्महे क्लीं द्वितीयं कामेश्व
रि धीमहि सौः तृतीयं तन्नः शक्तिः प्रचोदयात्
इति मूलगायत्रीं दशधा मालामादाय तामपि
मनसा संपूज्य ओं माले माले महामाले सर्वशक्ति
स्वरूपिणि चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सि
द्धिदा भव ओं ह्रीं सिद्ध्यै नमः इति गंधादिना सं
पूज्य गं अविघ्नं कुरु माले त्वं सर्वभावेषु सर्वदा
इति दक्षकरेण गृहीत्वा शिरसि श्रीगुरुं शु
क्लवर्णं कंठे मूलविद्यां पीतवर्णां हृदये श्रीप
रदेवतां श्रीगुरुचरणयोः स्वात्मानं ध्यात्वा भ्रू
मध्ये तेषां चतुर्णामैक्यं विभाव्य विशुद्धौ चतुष्ट
यमेकीभूतं विभाव्य श्रीपरदेवतारूपं विभाव्य
यथाशक्ति यथाविधि जपं विधाय दृष्टिं कृत्वा तु
नासाग्रे निमीलितनयने अथवा जिह्वां लंबां समा
साद्य दंतैर्दंतानपीडयन् ओष्ठौ संपुटकौ कृत्वा

श्री. स्थिरचित्तः स्थिरेंद्रियः सदादेवीं हृदि ध्या-
५ त्वा मौनी जपमथारभेत् जपांते ॐ त्वं माले
सर्वदेवानां प्रीतिदा शुभदा भव शुभं कुरुष्व
मे भद्रे यशो वीर्यं च सर्वदा इति मालां शिर
सि संस्थाप्य ॐ ह्रीं श्रीं इति संपुटमंत्रैस्त्रिः
पुनरपि प्राणायामादिकं विधाय ॐ गुह्या
तिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं सि
द्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि इति
तेजोमयं जपफलं श्रीदेवीवामहस्ते सम
र्प्य योनिमुद्रया प्रणमेत् मूलेन मालां संपुट
रहःस्थाने स्थापयेत् ॐ प्रातर्नमामि जगतां जन
न्याश्चरणांबुजं श्रीमत्त्रिपुरसुंदर्या नमितां या
हरादिभिः १ प्रातस्त्रिपुरसुंदर्या नमामि चर
णांबुजं हरिर्हरो विरिंचिश्च सृष्ट्यादीन्कुरुते
यथा २ प्रातस्त्रिपुरसुंदर्या नमामि पादपंकजं
यत्पाद्यमंबु शिरसि भाति गंगा महेशितुः ३ प्रा
तः पाशांकुशशरचापहस्तां नमाम्यहं उद्यदादि
त्यसंकाशां श्रीमत्त्रिपुरसुंदरीं ४ प्रातर्नमामि
पादाब्जं ययेदं भासते जगत् तस्यास्त्रिपुरसुंद
र्या यत्प्रसादान्निवर्तते ५ यः श्लोकपंचकमि
दं प्रातर्नित्यं पठेन्नरः तस्मै ददात्यात्मपदं श्री
मत्त्रिपुरसुंदरी इति स्तुत्वा प्रणम्य निजहृत्संस
मर्पयेत् ॐ प्रातःप्रभृति सायांतं सायादि प्रात शि.
रंततः यत्करोमि जगद्योने तदस्तु तव पूजनं स्व ५
कार्यानुष्ठाय ॐ त्रैलोक्यचैतन्यमये सुरेशि

श्रीसुंदरीसंचरणात्तथैव प्रातः समुत्थायतव
प्रियार्थं संसारयात्रामनुवर्त्तयिष्ये संसारयात्रा
मनुवर्त्तमाने त्वदाज्ञयाश्रीत्रिपुरे परेशि स्पर्धा
तिरस्कारकलिप्रमाद भयानि मांमाभिभवंतुमा
तः जानामिधर्मंनचमेप्रवृत्तिर्जानाम्यधर्मंन
चमेनिवृत्तिः त्वयाहृषीकेशहृदिस्थयाहं
यथानियुक्तोस्मितथाकरोमि इतिश्रीदेव्या
ज्ञांप्राप्य मूलाधारादिब्रह्मरंध्रांतचक्रपर्यंत
स्थिताभ्योगणपतिप्रभृतिदेवताभ्यः श्रीगु
रूपदेशज्ञातं सहजसिद्धमजपाजपसमर्प
येद्यथा यं अद्यपूर्वेद्युरहोरात्राचरितमु
च्छ्वासनिश्वासात्मकं षट्शताधिकमेक
विंशतिसहस्रसंख्याकमजपाजपं मूलाधा
रस्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञा
ब्रह्मरंध्रेषु चतुर्दलषड्दलदशदलद्वादश
दलषोडशदलद्विदलसहस्रदलेषु स्वर्णविं
द्रुमनीलपिंगलधूम्रविद्युत्कर्पूरवर्णेषु स्थि
ताभ्योगणपतिब्रह्मविष्णुरुद्रजीवात्मपरमात्म
श्रीगुरुपादुकाभ्योयथाभागशः समर्पयामि इ
तिहृत्तोजलैः संकल्प्यसमर्पयेत् यं मूलाधा
रचक्रस्थायगणपतये अजपाजपानांषट्श
तानि समर्पयामिनमः यं स्वाधिष्ठानचक्रस्था
यब्रह्मणेअजपाजपानांषट्सहस्राणिसमर्प
यामिनमः यं मणिपूरकचक्रस्थायविष्णवे
अजपाजपानांषट्सहस्राणिसमर्पयामिनमः

श्री· ६ यँ अनाहतचक्रस्थायरुद्राय अजपा
जपानांषट्सहस्राणिसमर्पयामिनमः
वँ विशुद्धचक्रस्थायजीवात्मने अजपा
6 जपानांसहस्रंसमर्पयामिनमः यं आज्ञा
चक्रस्थायपरमात्मने अजपाजपानांसह
स्रंसमर्पयामिनमः यं सहस्रदलकमल
कर्णिकामध्यवर्त्तिनी श्रीगुरुपादुकायै
अजपाजपानां सहस्रंसमर्पयामिनमः इ
त्यजपाजपंसमर्प्य एतावत्कर्तुमशक्तश्चे
त् यं अद्यपूर्वेद्युरहोरात्राचरितमुच्छ्वास
निःश्वासात्मकं षट्शताधिकमेकविंशति
सहस्रसंख्याकमजपाजपंब्रह्मरंध्रस्थस
हस्रदलकमलकर्णिकामध्यवर्त्तिन्यै श्री
गुरुपादुकायैसमर्पयामिनमः ॥६॥ इति
श्रीगुरुपादुकायाएवसमर्प्य ॐअद्यसूर्यो
दयमारभ्यआगामिसूर्योदयंयावत् अहो
रात्रेणाचरितमुच्छ्वासनिःश्वासकं षट्शा
ताधिकमेकविंशतिसहस्रसंख्याकमजपा
जपमहंकरिष्ये इतिकृतांजलिः संकल्प्य
अजपामंत्रेणप्राणायामंविधाय ॐअ
स्यश्रीअजपागायत्रीमंत्रस्य हंसऋषिः
अव्यक्तगायत्रीछंदः परमात्मादेवता ।
हंबीजं सःशक्तिः सोहंकीलकं ॐकार । शि· ६
स्तत्वंउदात्तः स्वरः नभःस्थानं हैमोवर्णः म
ममुक्तिसाधने श्रीजपेविनियोगः इति

कृतांजलिः स्तवान्यसेत् ॐ हंसात्मने ऋ
षयेनमः शिरसि ॐ अव्यक्तगायत्री छंद
सेनमो मुखे ॐ परमात्मने देवतायै नमो हृ
दि हंबीजायनमः गुह्ये सः शक्तयेनमः पाद
योः ॐ सोहं कीलकायनमो नाभौ ॐ ॐकार
तत्वायनमः हृदये ॐ उदात्तायस्वरायनमः
कंठे ॐ नमसेस्थानायनमो मूर्ध्नि ॐ हैमा
यवर्णायनमः सर्वांगेषु ममभोक्षार्थे जपे
विनियोगः इति ऋष्यादिन्यासः अथकर
न्यासः ॐ ह्रांसूर्यात्मने स्वाहा अंगुष्ठाभ्यां
नमः ॐ ह्रींसोमात्मने स्वाहा तर्जनीभ्यांस्वा
हा ॐ ह्रूंनिरंजनात्मने स्वाहा मध्यमाभ्यां
वषट् ॐ ह्रैंनिराभासात्मने स्वाहा अनामि
काभ्यां हुं ॐ ह्रौंअनंततनुः सूक्ष्मादेवीप्र
चोदयात् स्वाहा कनिष्ठिकाभ्यां वौषट् ॐ ह्रः
अव्यक्तबोधात्मने स्वाहा करतलपृष्ठाभ्यां
फट् अथषडंगः ॐ ह्रांसूर्यात्मने स्वाहा हृ
दयायनमः ॐ ह्रींसोमात्मने स्वाहा शिरसे
स्वाहा ह्रूंनिरंजनात्मने स्वाहा शिखायैवष
ट् ॐ ह्रैंनिराभासात्मे स्वाहा कवचायहुं ॐ
ह्रौंः अनंततनुः सूक्ष्मादेवीप्रचोदयात्
स्वाहा नेत्रत्रयायवौषट् ॐ ह्रः अव्यक्तबो
धात्मने स्वाहा अस्त्रायफट् अथध्यानं ॐ
द्यांमूर्धानंयस्यविप्रावदंति खंवैनाभिंचंद्रसू
र्यौचनेत्रे दिग्भिःश्रोत्रेयस्यपादौक्षितिश्च

श्री. ७ ध्यातव्योसौसर्वभूतांतरात्मा इतिविराड्रू
पंस्वात्मानंध्यात्वा तदनुसंधायीप्राणवायो
र्निर्गमप्रवेशात्मकमजपाजपंपंचविंशतिवारं
संजप्यसमर्प्य श्रीगुरूपदिष्टमार्गेणनादा
नुसंधानपूर्वकं निरस्तसमस्तोपाधिनाकेनापि
विहितव्यासेनप्रवर्तमानोस्मीतिविभाव्य इति॥
निजकृत्यंसमर्प्य स्वाकार्येनुष्ठानाय ओंसमुद्र
मेखलेदेवि पर्वतस्तनमंडले विष्णुपत्निनम
स्तुभ्यं पादस्पर्शंक्षमस्वमे इतिभूमिंप्रार्थ्यप्रथा
मानुसारेणतस्यांपादंनिधाय पदेपदेमूलञ्च
रन् ओंनंदंतुसाधकाःसर्वेविनश्यंतुविदूषका
ः अवस्थाशांभवीमेस्तुप्रसन्नोस्तुगुरुःसदात
तःगृहाद्बहिर्निर्गत्यनापाद्दहिर्वानैरृत्यांया
म्यांवादिशिशरक्षेपमात्रांभुवमतीत्य मलमू
त्रोत्सर्गशौचाचमनादिकं विधाय अनिषि
द्धतरुविहितकाष्ठेन क्लींकामदेवायस
र्वजनप्रियायनमः इतिदंतान्विशोध्य जिह्वा
मलमुल्लिख्य दंतकाष्ठंप्रक्षाल्यतत्परः शुद्ध
देशेत्यक्त्वा मुखंमूलेनप्रक्षाल्याचम्य कुशा
दिकमादाय नद्यादितीरंगत्वा तीर्थाद्बहिः क
टिशौचंविधाय स्वशाखोक्तविधिना वैदिक
स्नानंविधाय नाभिमात्रेजलेस्थित्वा ओंअद्या
मुकमासस्यामुकपक्षस्यामुकतिथौ अमुकन शि.
क्षत्रेःमुकगोत्रोमुकशर्माश्रीकुब्जदेवताप्रीत ७
येतांत्रिकविधिनास्नानमहंकरिष्ये स्वशाखो

क्तविधिना वैदिकस्नानं विधाय तान्त्रिकमार
भेत् ततः संकल्प्य प्राणायामऋष्यादिकर
षडंगन्यासान्विधाय स्वपुरतो जले हस्तमात्रं च
तुरस्रं तीर्थं परिकल्प्य त्रिकोणचक्रं विलि
ख्य ॐ ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते र
वेः तेन सत्येन देवेशि तीर्थं देहि दिवाकरेति
सूर्यात्तीर्थं प्रार्थ्य क्रोमित्यंकुशमुद्रया सूर्यमं
डलं भित्वा ॐ गंगे च यमुने चैव गोदावरि सरस्व
ति नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु
आवाहयामि त्वां देवि स्नानार्थमिह सुंदरि
एहि गंगे नमस्तुभ्यं सर्वतीर्थसमन्विते इति सूर्य
मंडलात् तीर्थमाकृष्य पुरः कल्पिततीर्थे संयोज्य
पुनः सूर्यमंडलादेव यं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः
सर्वानंदमये तीर्थशक्ते एहि एहि स्वाहा इति
तीर्थशक्तिमावाह्य तस्मिन् तीर्थमंडले तां ध्या
येत् ॐ सर्वानन्दमयीमशेषदुरितध्वंसां मृगांक
प्रभां व्यस्तां चोर्ध्वकरद्वयेन दधतीं पाशं सृणिं च
क्रमात् दोर्भ्यां चामृतपूर्णहेमकलशं शुक्ला
क्षमालां वरां गंगासिंधुसरिद्द्वयादिसहितां श्री
तीर्थशक्तिं भजे इति ध्यात्वा ॐ नमो भगवति श्री
वेदमंत्रवाहिके अविके महामालिनि एह्येहि भग
वति अशेषतीर्थालवाले ह्रीं श्रीं शिवजटाधिरू
ढे गंगे गंगाम्बिके स्वाहा इति मंत्रेण सप्तधाभिमं
त्र्य ह्रीमित्यालोड्य वमिति धेनुमुद्रयामृतीकृ
त्य प्रथमकूर्चं आसनतासने नमः द्वितीयं वि

श्री·
२

8

यानत्वात्मनेनमः तृतीयंशिवतत्वात्मनेनम
: इतितत्वत्रयंजलेविन्यस्य तत्रश्रीच
क्रंविभाव्यसूर्यमण्डलाद्देवी मावाह्यष
डंगेनसकलीकृत्यतांसावरणां स्नापयित्वा
धेनुमुद्रयामूलेनतज्जलं मष्टधाभिमंत्र्य
तत्रैवनामस्मरणपूर्वकं त्रिर्निमज्योन्मज्य
कुंभमुद्रयामूलविद्यया स्वशिरसित्रिरभिषि २
च्य मूलेन श्रीदेवींत्रिः संतर्प्य श्रीदेवी
स्वरूद्दिसमानोय ऐं प्रथमकूटात्मन
त्वंशोधयामिस्वाहा ऐं द्वितीयंविद्यात
त्वंशोधयामिस्वाहा तृतीयंशिवतत्वंशो
धयामिस्वाहा इतित्रिराचम्य तीरमाग-
त्यधौतवाससीपरिधाय त्रिपुंड्रकमूर्ध्व
पुंड्रकंवातिलकंविधाय वैदिकसंध्यां
समाप्य तांत्रिकीमारभेत् तत्रविधिवदाचम्य
मूलेनत्रिखंडांबद्ध्वा प्राणायामकृष्यादिकं
रषडंगन्यासान्विधाय स्वपुरतोधेनुमुद्रया
तत्रैवरचितंतीर्थजलममृतीकृत्य मूले
नाष्टधाभिमंत्र्य तेनजलेनतत्वमुद्रया अं
नमः इत्यादिलकारांतैः मातृकाक्षरैः स्वशि
रःप्रोक्ष्यमूलेनचत्रिः प्रोक्ष्य सूर्यमंडलेदे
वींध्यात्वा दक्षहस्तेनजलमादाय वामेना
च्छाद्यलंवंरंयंहं इतिपांचभौतिकैः महा शि·
मंत्रैः सप्तवाराभिमंत्र्य मूलेनचत्रिरभिमं २
त्र्यतज्जलबिंदुभिर्वामहस्ततत्वमुद्रया मूले

नंस्वशिरःप्रोक्ष्यावशिष्टंजलंवामहस्तेनि
धाय तेजोरूपंनज्जलंतत्सुषुम्णयाऽऽ
कृष्य स्वदेहांतःस्थितंसकलकल्मषंप्र
क्षाल्यतज्जलंकृष्णवर्णं पिंगलयाबहि
र्निर्गतंमत्वा पुनःदक्षहस्तेकृत्वा स्ववाम
भागेज्वलद्वज्रशिलांध्यात्वा ॐ श्लीं पशु
हुं फट् इतिपाशुपतास्त्रमंत्रेणतस्यां
शि[illegible]स्फाल्य हस्तौप्रक्षाल्य मूले
नजले[illegible]राय प्रवहत्ता[illegible]सहस्रदल
परमामृतेनैकीभूतंविभाव्य निर्गमय्यतेन
जलेन अमृतमालिन्यैस्वाहा इतिमंत्रेणकु
शैः स्वशिरस्त्रिःप्रोक्ष्य ॐ ऐं ह्रीं श्रीं प्रथम
कूटं आत्मतत्त्वंशोधयामिस्वाहा यं द्विती
यंविद्यातत्त्वंशोधयामिस्वाहा यं तृतीयंशि
वतत्त्वंशोधयामिस्वाहा यं पुनःतृतीयंशि
वतत्त्वंशोधयामिस्वाहा यं प्रथमंआत्मतत्त्वं
शोधयामिस्वाहा यं सर्वमूलंसर्वतत्त्वंशो
धयामिस्वाहा इत्यपित्रिः इतिनवधाजले
नाचम्यजलमंजलिनादायोत्थाय यं प्रथ
मकूटं त्रिपुरदेवि विद्महे यं क्लीं द्वितीयं
कामेश्वरि धीमहि यं सौंः तृतीयंतन्नःश
क्तिः प्रचोदयात् श्रीमहात्रिपुरसुंदरीश्री
पादुकायै एषोऽर्घः स्वाहा इतित्रिरर्घ्यंदत्वा
ॐ ह्रीं ह्रीं हंसः श्रीकुललक्ष्मीपएषतेऽर्घः
स्वाहा इतिकुललक्ष्मीयार्घ्यंदत्वा मूलेन

श्रीदेवीं त्रिः संतर्प्य श्रीसूर्यं च त्रिः संतर्प्य
मूलाधारे प्रथमकूटं मूलादिब्रह्मरंध्रांतं
ध्यात्वा आकाशस्थवह्निमंडले समावा
स्य तत्र वाग्भवं वागीश्वरीं ध्यात्वा ऐं त्रिपु
रे देवि विद्महे वागीश्वरि धीमहि तन्नो मु
क्तिः प्रचोदयात् इत्यनया मूलदेव्यै अ
र्घ्यं दत्त्वा त्रिः संतर्प्य श्रीगुरुं प्रणम्य
प्राणायामऋष्यादिकरषडंगन्यासा
न्विधाय एवौं क्लीं मूलगायत्रीं च जप्त्वा
प्रातः वागीश्वरीगायत्रीं जप्त्वा प्राणाया
मादिना श्रीदेव्यै जपं समर्प्य सूर्यमंडला
न्मूलदेवीं स्वहृदि वह्निमंडले च वागी
श्वरीं स्वरूपसहितां मूलाधारे विसृज्य
श्रीगुरुं प्रणमेदिति प्रातः संध्याविधिः ॥
अथ मध्याह्नसंध्या तत्र प्राणायामादि सूर्यत
र्पणांतं प्रातःसंध्यावदेव बीजसंध्यां कुर्यात्
तत्र मध्याह्ने अनाहतचक्रे मूलविद्याया
द्वितीयकूटं रक्तवर्णं ध्यायंस्तत्तेजो वहिः सू
र्यमंडले समावास्य तत्र कामेश्वरीं यौवन
रूपां ध्यात्वा क्लीं त्रिपुरे देवि विद्महे कामे
श्वरि धीमहि तन्नः क्लिन्ने प्रचोदयात् इ
त्यनया श्रीदेव्यै अर्घ्यं दत्त्वा एवं यथाश
क्ति जप्त्वा तुरीयां मूलगायत्रीमपि जप्त्वा द्वि
तीयकूटं मूलमपि यथाशक्ति जप्त्वा प्राणा
यामादिपूर्वकं जपं समर्प्य प्रणम्य मूले

देवीकामेश्वरींचहृदिविसृज्य श्रीगुरुंप्र
णमेत् इतिमध्यान्हसंध्या अथसायंसं
ध्या ततः प्राणायामादिसर्वंतर्पणांतं
पूर्ववद्विधाय बीजसंध्यांकुर्यात् सायमा
ज्ञाचक्रे तृतीयकूटंशुद्धस्फटिकसंकाशे
माकाशस्थसोममंडलेसमावास्य तत्र
महेश्वरींश्रीह्रौंध्यात्वा सौः त्रिपुरेदेवि
विद्महेशक्तीश्वरिधीमहि तन्नोम्बेप्र
चोदयात् इत्यनयार्घ्यंदत्वा तुरीयगा
यत्रीमेनांगायत्रींचयथाशक्तितृतीयकू
टंमूलंच जप्त्वा प्राणायामादिपूर्ववज्जपं
समर्प्य सोममंडलान्मूलदेवींहृदिअमृते
श्वरींचाज्ञाचक्रेसमानीय श्रीगुरुंप्रण
मेदिति सायंसंध्या अथार्धरात्रसं
ध्याप्यर्कमंडलेदेवीध्यानंविनाप्राणा
यामाद्याचमनपर्यंतं पूर्ववद्विधायसह
स्रारेतुरीयबीजंमूलविद्यांचषोडशरू
पंपद्मरागप्रभंध्यात्वावह्नितारामंडलेस
मावास्य तत्रभगवतींयथोक्तरूपांध्या
त्वा तुरीयबीजेनसहतुरीयगायत्र्या त
त्रमूलदेव्यैअर्घ्यंदत्वा तुरीयगायत्रीं
तुरीयबीजंमूलविद्यांयथाशक्तिजप्त्वा
जपंसमर्प्य श्रीदेवींस्वहृदिसहस्रारेच
तुरीयदेवींविसृज्य कामकलारूपंस्वात्मा
नंध्यायेदितितुरीयसंध्याविधिः एत

श्री· १० त्संध्याचतुष्टयमावश्यकं कार्यं प्रथमयामा
तरेवचतुष्टयंकार्यंकेवलैवमाम्नातः संध्याका
र्यो तांतस्यजेदितिशिवशासनं इत्थमेव
10 संध्याकरणानंतरंतर्पणंवैदिकं समाप्य तां
त्रिकमारभेत् तत्रप्राणायामादिपूर्वकं सपु
ष्पोजले पूर्ववत्तीर्थमावाह्य वमितिधेनु
मुद्रयामृतीकृत्य मूलेनाष्टवारमभिमं
त्र्य तत्रश्रीचक्रंविभाव्य तत्रश्रीदेवीमा
वाह्य मनसासर्वोपचारैः संपूज्य मूलं श्री
महात्रिपुरसुंदरीश्रीपादुकांतर्पयामिनमः
इतियथाशक्तिसंतर्प्य यथाशक्त्यावर
णदेवतास्यसंतर्प्य मूलदेवीमेवसायुध
सवाहनसपरिवारसावरणा श्रीमहात्रिपु
रसुंदरीश्रीपादुकांतर्पयामिनमः इतित्रिः
सकृद्वासंतर्प्य ऐशान्यां श्रीगुरुपादुकांत
र्पयामीतित्रिभिः सकृद्वासंतर्प्य वन्हौ परमगु
रुश्रीपादुकांतर्पयामिनमः नैरृत्यां परमाचा
र्यगुरुश्रीपादुकांतर्पयामिनमः वायव्ये परमे
ष्ठिगुरुश्रीपादुकांतर्पयामिनमः इतिसंतर्प्य ती
र्थे स्वस्थानेविसृज्य प्राणायामादिपूर्वकंजपं
समर्प्य श्रीदेवीहृदिस्थापयेदितितर्पणं तत
ः उत्थाय ॐवज्रोदकेहुंफट्स्वाहा इत्यने
नजलकुंभंगृहीत्वा ॐह्रींविशुद्धपापानि
शमयानिशमयाशेषविकल्पानपनयहुं इ
तिहस्तौपादौप्रक्षाल्यमौनीमूलंस्मरन्यागगे

द्वारागतस्य वक्ष्यमाणक्रमेणास्तामाचार्योद्देकेनतद्दा
रदेवताः पूजयेत् सुधार्णवचतुष्टयायनमः १
[illegible]नमः ५ नवखंडविराजितायनवरत्नद्वीपा
यनमः नंदनोद्यानायनमः ॐ स्वर्णप्राकाराय
नमः तद्द्वारस्य च सोत्तरशाखयोः उपर्य
पश्च ॐ गं गणपतयेनमः ॐ क्षं क्षेत्रपाला
यनमः ॐ ह्रां द्वारश्रियैनमः ॐ दं देहल्यै
नमः ॐ कदंबकाननायनमः ॐ श्रीरत्न
मंडपायनमः ॐ काराण्यैनमः इति संपूज्य
द्वारोर्ध्वशाखायां दक्षिणे ॐ मं महाल
क्ष्म्यैनमः वामे ॐ सं सरस्वत्यैनमः मध्ये
ॐ दुं दुर्गायैनमः ॐ ह्रां द्वारश्रियैद्वारस्य
दोर्दक्षवामशाखयोः अधोधः ॐ शं शं
खनिधिवसुधाराभ्योनमः ॐ पं पद्मनिधिव
सुधाराभ्योनमः ॐ गं गणपतयेनमः ॐ क्षं
क्षेत्रपालायानमः ॐ मां मायायैनमः ॐ चिं
चिल्लक्ष्म्यैनमः ॐ गं गंगायैनमः ॐ यं यमु
नायैनमः ॐ धं धात्र्यैनमः ॐ विं विधात्रै
नमः ॐ यां योगिनीभ्योनमः ॐ दं देहल्यैन
मः ॐ द्वाराग्रे ह्रां द्वारश्रियैनमः ॐ वं वरुणा
यनमः इति पश्चिमद्वारे उत्तरद्वारे महाल
क्ष्म्यादि देहल्यंतं संपूज्य द्वाराग्रे ॐ वां व
टुकायनमः ॐ ह्रां द्वारश्रियैनमः ॐ सं सोमा
यनमः ॐ पूर्वद्वारे पूर्ववद्देहल्यंतं संपूज्य द्वा
राग्रे ॐ क्षां क्षेत्रपालायनमः ॐ लं इंद्रा

श्री. ११ यनमः ह्रूंद्वारश्रियेनमः दक्षिणद्वारे ग्रा
मदेवतांतंसमर्च्यद्वाराग्रे थं गौंगण
नाथायनमः थं ह्रांद्वारश्रिये थं दंधमा
यनमः पुनःपश्चिमद्वारे थं रत्नसोपान
पंक्तयेनमः नामाहृत्य ऐंनमोभगवति
माहेश्वरि पशुजनमनश्चक्षुस्तिरस्करणं
कुरुरु स्वाहा श्रीतिरस्करिणीश्रीपादुकां
पूजयामिनमः इतिसंपूज्य पालितंबहिरिं
द्रार्घैः पारमैश्वर्यशोभितम् प्रपद्येपश्चिम
द्वारंभवान्यामंदिरम्महत् इतिध्यात्वा थं
पश्चिमद्वाराय महामणिमण्डपायनमः इति
मंडपंसंपूज्य तालत्रयपूर्वंद्वारमाहृत्य
थं नीलतुरंगमधिरूढस्यसुशोभमानानी
लांशुकाभरणमाल्यविभूषणाढ्या निद्रा
पटेनभुवनानितिरोदधाना खड्गायुधाभग
वतीपरिपातुचास्मान् ततःसिद्धार्थास्स
तारित्नानाराचास्त्रयोगेन ॐअपक्रामंतु
भूतानि पिशाचाःप्रेतगुह्यकाः येचात्रनि
वसंत्येनेदेवताभुविसंस्थिताः ॐअपस
र्पंतुतेभूतायेभूताभुविसंस्थिताः येभू
ताविघ्नकर्तारस्तेनाश्यंतुशिवाज्ञया
।। इत्यस्त्रमंत्रमुच्चार्यमंडपांतःप्रोक्ष्य
तस्मान्निर्गतानांविघ्नानां स्वमामांग
संकोचेनमार्गंदत्वा पाशांडकारिणो
भूत्वाभूमौयेचांतरिक्षगाःदिविस्थो

लोकेस्थितापेच तेनस्वंतुस्थिवाज्ञया इत्ये
नेन्द्रेणवामपार्ष्णिघातत्रयेण वाम दिव्य
दृष्ट्याचभौमांतरिक्षदिव्यान्विघ्नानुत्सार्य वाम
पादपुरःसरंमंडपांतःप्रविशेत् तत्रवस्त्रेणाहृ
रमाच्छाद्यघंटावादनपूर्वकंह्रौं इतिमंत्रेणपंच
गव्यार्घ्यपात्रजलाभ्यां हूं अस्त्रायफट् इतिमंड
पांतः प्रोक्ष्य तत्रमंडपंप्रदीप्यमाल्यादिभिःसं
भूष्य नैरृते वं वास्तुपुरुषायनमः वं वास्त्वधी
श्वरायब्रह्मणेनमः ईशाने धं कुलनाथश्रीपा
दुकांपूजयामिनमः वें रक्तवर्णोद्वादशशक्ति
सहितश्रीदीपनाथश्री इतिसंपूज्य अस्मिन्
क्षेत्रेदीपनाथनिर्विघ्नसिद्धिहेतवे श्रीविद्या
क्रमपूजार्थमनुज्ञांतुमर्हसि इतिप्रार्थ्य अःफ
डिति पूजावेदींगत्वा ॐ अस्यश्रीआसनशो
धनमंत्रस्य मेरुपृष्ठऋषिः सुतलंछंदःकू
र्मोदेवता आसनेरोपणेविनियोगः इतिकृतां
जलिः मेरुपृष्ठऋषयेनमः शिरसि सुतलंछं
दसेनमोमुखे श्रीकूर्मदेवतायैनमः हृदि आ
सनारोपणेविनियोगः सर्वांगेषु इतिविन्यस्य
पृथ्वीप्रार्थनेविनियोगः कृतांजलिरुक्त्वा ॐ
पृथ्वि त्वयाधृतालोकादेवित्वंविष्णुनाधृता।
त्वंचधारयमांदेविपवित्रंकुरुचासनं इतिपृथ्वीं
प्रार्थ्य जपस्थानंमूलेनवीक्ष्यास्त्रेणप्रोक्ष्यास्त्रे
णैवकुशैस्त्रिः संताड्यकवचेनाभ्युक्ष्य मंडूका
यनमः वं कालाग्निरुद्रायनमः चं मूलप्रकृ

स्यैनमः यं पृथिव्यैनमः यं सुधायैनमः समु
द्रायनमः यं चिंतामणिगृहायनमः यं
रत्नवेदिकायैनमः यं कमठायनमः यं
शेषायनमः यं मणिपीठायनमः यं ना
नामुनिगणेभ्योनमः यं नानादेवेभ्योन
मः यं पद्मायनमः यं संवित्नालायनमः
यं शतदलपद्मासनायनमः यं सहस्र
दलपद्मासनायनमः यं ह्रीं आधारशक्ति
कमलासनायनमः इति संपूज्य यं आ
सनाग्नेये यं गं गणपतयेनमः नैरृते यं
दुं दुर्गायैनमः वायव्ये यं सं सरस्वत्यैन
मः ईशाने यं क्षं क्षेत्रपालायनमः इति
संपूज्य तत्रपद्मासनेनोपविश्य ॐ सं
विदे अमृतसंभूते अमृतपुष्पसदानघे अमृ
तानांचतत्सर्वं पवित्राभवसर्वदा ॐ आ
सनायैनमः । सि । स्वाहा सिद्धमृत्युसुखे दे
वि हीनबोधप्रबोधिनि एजप्रजावशंक
रि शत्रुपक्षनिसूदिनि ऐंसावित्र्यायनमः
स्वाहा अज्ञानेंधनदीप्ताग्ने ज्ञानाग्निप्रज्व
लरूपिणि आनंदस्याहुतिंप्रीतिं सम्यग्ज्ञा
नेप्रयच्छमे ह्रीं वैश्यायैनमः स्वाहा नम
स्यामि नमस्यामि योगमार्गप्रदर्शिनि त्रैलो
क्यविजयेमातः समाधिफलदाभव क्लीं
रुद्रायैनमः स्वाहा इति संशोध्य ॐ अमृ
ते अमृतोद्भवे अमृतवर्षिणि अमृतमा

कर्षय २ सिद्धिं देहि २ श्रीमहात्रिपुरसुंदरी
परं मे वशमानय २ स्वाहा इति अभिमंत्र्य तदुप
रि मूलं सप्तवारं संयोज्य आवाहनादि मुद्रा
धेनुयोनी प्रदर्श्य दिग्बंधनं च कृत्वा कोरि
काभिः त्रिकालत्रय पूर्वं दिव्यद्रव्यापात्रमिदं पाने
अवसर्वविघ्नान्निवार्य सप्तधा त्रिधा वा प्रसारं प्रे
श्रीगुरुं तन्मंत्रेण संतर्प्य तद्विधिर्यथा श्रीगुरु
कौल महानंदानंदनाथ श्रीभाग्यवतांबाश्री
पादुकां पूजयामि नमः तर्पयामि नमः श्रीप
रमगुरु कौलगोविंदानंदनाथ श्रीशारदांबा
श्रीपादुकां पू॰ त॰ श्रीपरमाचार्य गुरु श्री
ज्योतिःप्रकाश कौलानंदनाथ श्रीपादुकां
श्रीभगवत्यंबा श्रीपादुकां पू॰ त॰ श्रीपरमे
ष्ठिगुरु श्रीमच्छ्रीसाहिब कौलानंदनाथ श्री
पादुकां श्रीदिव्यंबा श्रीपादुकां पूज॰ तर्पया
मि नमः श्रीदिव्यौघ सिद्धौघ मानवौघ श्रीगु
रुपादुकां पू॰ त॰ ततो मूलं श्रीमहात्रिपुरसुं
दरी श्रीपादुकां पूज॰ त॰ इति सप्तधा संतर्प्य
श्रीगणेशादिभैरवांतं संतर्प्य ह्रीं ऐं वद वद
वाग्वादिनि मम जिह्वाग्रे स्थिरीभव सर्वस
त्त्ववशंकरि स्वाहा इति मंत्रेण मुखे जुहुयात्
ततः आनंदमयो भूत्वा शिवोहमिति भावय
रक्तवसनानुलेपाद्यलंकृतः तां कृत्वा पूरि
ताऽ ततः श्रीगुरुपादिष्टविधिना श्रीचक्रं पु
रतः संस्थाप्य मूलेन पुष्पांजलिं क्षिप्त्वा सवा

मार्गे भूतेभ्यो नमः इति भूतबलिं दत्वा
भूतानि यानीह वसंति भूतले बलिं गृही
त्वा विधिवत्प्रयुक्तं अन्यत्र वासं परिक
ल्पयंतु स्वम्यंतु चान्यत्र नमोस्तु तेभ्यः इति
भूतान्विसृज्य उत्तरे ॐ नमो भगवते शल
भशाल्वाय पक्षिराजाय मम शत्रून्नाशय
२ ह्रौं घ घ हुं फट् स्वाहा श्रीशलभरुद्रश्री
पादुकां पूजयामि नमः नह्राये ॐ नमो भग
वति शलभशालि पक्षिराज्ञे मम शत्रून्नाश
य २ हुं फट् स्वाहा श्रीशलभीदेवीश्रीपा.
ॐ सहस्रार हुं फट् श्रीसुदर्शनाय नमः इ
ति पूर्वे दिशि ॐ ह्रीं स्फुर २ प्रस्फुर २ घोर २
ततुरूप चट २ प्रचट २ कह २ वम २ बंध
२ घातय २ हुं फट् इति दक्षिणे ॐ उत्तिष्ठ पु
रुषि किं स्वपिषि भयं मे समुपस्थितं यदि
शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा
श्रीदुर्गायै नमः इति पश्चिमे बहिः स्थाना
त्संपूज्य स्वदक्षे गन्धादि पूजोपकरणं नि
धाय ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः फडिति स्मरन्नाराच
मुद्रया दिव्यदृष्ट्या पुष्पादिकं विलोक्य वाम
भागस्थं जलकुंभं आमिति वामहस्तेन स्पृ
ष्ट्वा सौमिति दक्षकराग्रेण तत्स्थं जलं च
स्पृष्ट्वा रमिति दीपशिखां च स्पृष्ट्वा करौ
प्रक्षाल्य वामे ऐं गुरुभ्यो नमः दक्षे गं गणप
तये नमः अग्रे च श्रीपरदेवतायै नमः इति

प्रणम्य मूर्ध्नि संपुटमुद्रां विधाय ह्सौः सह
स्रमल्लवयरां सहस्रमल्लवयऊं सहस्रमल्ल
वयरीं ह्सौः श्रीपरपावकसर्वाराध्यसर्वमूर्ध
पुरनाथसर्वगुरुस्वयंगुरु श्रीगुरुनाथरहस
ह्स्रमल्लवयऊं सहस्रमल्लवयरां श्रीशंभुगु
रु ह्सौः सहहमल्लवयऊं श्रीमच्छ्रीस्वामि
प्रतापकौलानंदनाथश्रीपादुकां पूजयामि
श्रीदयावसंता श्रीपादुकां च पूजयामिनमः
इतिस्वशिरसि श्रीपादुकां च पूजयामिनमः इ
।) विन्यस्य पुनरनयैव विधया गंधादिना संपूज्य
गंधादिपंचमुद्राः प्रदर्श्य ॐ नमो गुरवे नमस्ता
पिष्टदेवस्वरूपिणे यस्य वागमृतं हंति विषं संसा
रसंज्ञकं इति नमस्कारमुद्रया प्रणम्य चं श्रं
श्रीं सौः इति करशुद्धिविद्यया करावन्यो
न्यमर्दनेन संशोध्य मध्यमयोः चं श्रीं नमः
अनामिकयोः चं श्रीं नमः कनिष्ठयोः चं
सौः नमः अंगुष्ठयोः चं श्रीं नमः तर्जन्योः चं
श्रीं नमः करतलपृष्ठयोः चं सौः नमः इतिवि
न्यस्य ऐं क्लीं सौः चं सौः नमः इति। नमस्त्रि
पुरसुंदरि मां रक्ष २ इति मूर्धादिपादांतं त्रि
व्यापकं विन्यस्य पुनरुच्चार्य ऊर्ध्वोर्ध्वताल
त्रयं तर्जन्यंगुष्ठशब्देन दशदिग्बंधनं त्रिशू
लाकारयोः व्यस्तयोः करयोः स्वमूर्धानं परित
स्त्रिर्भ्रामणेन वह्निप्राकारत्रयं कृत्वा प्राणा
यामत्रयं कृत्वा भूतशुद्धिं कुर्यात् पादादिजा

श्री. १४ नुपर्यंतं पृथ्वीस्थानं चतुरस्रं वज्रलांछि-
तं पीतवर्णं ब्रह्मदैवतं निवृत्तिकलाधि-
14 ष्ठितं लंबीजयुतं ध्यात्वा जान्वादिनाभि-
पर्यंतं अपांस्थानं शुक्लवर्णमर्धचंद्रा-
कारं श्वेतं गद्वयेपि पद्मलांछितं विष्णुदैवतं
प्रतिष्ठाकलाधिष्ठितं वंबीजयुतं ध्यात्वा
नाभ्यादिकंठपर्यंतं वन्हिमंडलं स्वस्तिकोपे-
तं त्रिकोणाकारं रक्तवर्णं रुद्रदैवतं विद्या-
कलाधिष्ठितं रंबीजयुतं ध्यात्वा कंठादि-
भ्रूमध्यपर्यंतं वायुमंडलं षट्कोणाकारं
षड्बिंदुलांछितं वृत्तोपेतं धूम्रवर्णं ईश्व-
रदैवतं शांतिकलाधिष्ठितं यंबीजयुतं ध्या-
त्वा भ्रूमध्यादिब्रह्मरंध्रांतं आकाशस्थानं
वृत्ताकारं ध्वजलांछितं धूम्रवर्णं सदा-
शिवदैवतं शांत्यतीताकलाधिष्ठितं हंबी-
जयुतं ध्यात्वा तत्र पंचभूतमये देहे धर्मकं-
दसमुद्भूतं ज्ञाननालकं ऐश्वर्याष्टदलो-
पेतं परवैराग्यकर्णिकं स्वहृदयारविंदं ध्या-
त्वा तत्कर्णिकायां जीवात्मानं अंगुष्ठमा-
त्रं प्रदीपकलिकाभास्वरं अनादिसत्तासं-
वृत्तपरचिद्रूपं संचिंत्य प्राणुक्तरूपेण मू-
लाधारात्कुंडलिनीमुत्थाप्य सुषुम्णाव- शि.
त्मेना मूलाधाराद्यनाहतांतःस्थवर्णवर्णा- १४
धिदेवतासंतीहृदयकमलमानीय तया
कवलीकृतं जीवात्मानं ध्यायन् सुषुम-

णावलीनाविशुद्ध्यादिचक्रस्थवर्णावर्णौ
द्दिदेवतागनसंनीत्व्रह्मरंध्रं नीत्वा तत्रस्थित
सहस्रदलकमलकर्णिकामध्यवर्तिनिपर
मात्मज्योतिषि सवर्णवर्णदेवताकदंबकं
जीवात्मानं हंस इति मंत्रेण संयोज्य कुंडलि
नीस्वस्थानमानीय तत्संहारं कुर्यात् तत्रपृ
थ्वीस्थाने पादगमनगंतव्यगंधघ्राणपृथिवी
ब्रह्माणि इति समानवायून्संस्मृत्य ॐ ह्रूं ब्र
ह्मणे पृथिव्यधिपतये निवृत्तिकलात्मने हुं फ
ट् स्वाहा इति मंत्रेण तान् कुंडलिनी द्वारा अपां र
स्थाने संहरेत् ततोऽपांस्थाने हस्तरसनदातव्य
रसरसनातत्त्वविष्णुप्रतिष्ठोदानान्संचिंत्य ॐ
ह्रीं विष्णवे जलाधिपतये प्रतिष्ठाकलात्मने हुं
फट् स्वाहा इति तान्सर्वान् कुंडलिनी द्वारा वन्
न्हिमध्ये संहरेत् ततो वन्हिस्थाने पायुवि
सर्गविसर्जनीयरूपचक्षुवन्हिरुद्रविद्याव्या
न्संस्मृत्य ॐ हूं रुद्राय तेजोधिपतये विद्याकला
त्मने हुं फट् स्वाहा इति तान्सर्वान्वायुमंडले
संहरेत् ततो वायुस्थाने उपस्थानंदस्पर्शस्प
ष्टव्यवाय्वीश्वरप्राणापानान्संस्मृत्य ॐ हैं ई
श्वराय वायवाद्यधिपतये शांतिकलात्मने हुं
फट् हुं फट् स्वाहा इति तान्सर्वानाकाशस्था
ने संहरेत् ततः आकाशस्थाने वाग्वचन
वक्तव्यशब्दश्रोत्राकाशसदाशिवायाऽ
काशाऽधिपतये शांत्यतीताकलात्मने हुं

पर् स्वाहा इतिनानस्वबीजं कुंडलिन्यां संहृत्य
१५ तां विंदु शक्तौ विंदु शक्तिं नादशक्तौ नाद
शक्तिं परमशक्तौ प्राणावेण संहृत्य ॐ ह्रीं
15 हूं [illegible] स्वाहा इतिनां परमशक्तिं पूर्वोक्तपर
मात्मनि नियोज्य वितूलशरीरे वामकुक्षि
स्थितं पापपुरुषं [illegible]मभं वीरहत्यादि
रक्तकनकस्तेयादि [illegible]अहृदयं तथापान सुर
मुकं गुरुतल[illegible] हृदयं तत्संसर्गिपा[illegible]
दमगमस्तं [illegible]पातः उपपातक रोमाणं रक्त
शमश्रु[illegible] चनेत्र [illegible] खड्गधरं कुक्षि पापं
[illegible] नयेत् इति पापपुरुषं विचिंत्य
[illegible] यं बीजेन सह वायुमापूर्य
नाभिस्थषट्कोणाकारेवायु मंडले संयोज्य
तत्र यमिति वायुबीजं धूम्रवर्णं संचिंत्य
कुंभकेन यमिति वायुबीजमावर्त्तयंस्तदु[illegible]
स्थितेन महावायुना स्वपापपुरुषं स्वशरी
रस्थं संशोष्य वायुं दक्षिणनासया विरेच्य
पुनर्दक्षिणनासया विरं बीजेन सह वायुमा
पूर्य हृदयाधारे संयोज्य तत्रस्थवन्हिमंड
ले रमिति वन्हिबीजं रक्तवर्णं विचिंत्य कुं
भकेन रमिति बीजमावर्त्तयंस्तदुत्थितमहा
वन्हिना स्वपापपुरुषं स्वशरीरस्थं संदह्य पा
पपुरुषभस्मना सहितं वायुं वामनासया विरे श्रि॰
च्य पुनर्वामनासया वं बीजेन सह वायुमापू १५
र्य ब्रह्मरंध्रे संयोज्य तत्रस्थचंद्रमंडले

वमिति अमृतबीजेन शुक्लवर्णं विचिंत्य कुं
भकेन वंबीजमावर्त्तयंस्तत्रस्थामृतधारया
स्वदेहभस्मप्लुतं विभाव्य तं वायुं दक्षनासया
विरेच्य पुनर्दक्षनासया लंबीजेन सहगम्यं
अमृतमयं मूलाधारस्थपार्थिवमंडलं संपीड्य त
[illegible]त्वमिति पृथ्वीबीजेन [illegible] विचिंत्य कुंभके
न [illegible]जमावर्त्तयंस्तत्र [illegible]जेन [illegible] ला
विन [illegible] पृथ्वीहस्य ततो वायुं [illegible] नासयाविरे
च्य पुनर्वामनासयामां बीज[illegible] वायुमा
र्यमूलाधारस्थं विंदुरूप [illegible] मायापा [illegible] तत्र ल
ल्लार्कवर्णं संचिंत्य कुंभकेन मायापाशी [illegible]
तेन कृष्णवर्णपापपुरुषेन सर्वे [illegible]
विभाव्य ततो वायुं दक्षनासया विरेचयेत् इति
स्थूलशरीरनि[illegible] सूक्ष्मशरीरं निष्पाद
यदेत् ततः ब्रह्मरंध्रस्थसहस्रारकमलस्थपरमा
त्मनः सकाशात्सकलजगत्स्थितिसृष्टिसंहारवि
तपरब्रह्मेच्छारूपिणीं परशक्तिं ॐ ह्रीं नमः
स्वस्थानमानीय ततो नादशक्तिं ततो विंदुश
क्तिं मयावेणास्पृष्ट विंदुशक्तेः सकाशात्सकल
जगत्स्थितिहेतुभूतां कुंडलिनीं मयावेणानिःसा
र्य ततः ॐ ह्रौं सदाशिवायाकाशाधिपतये
शांत्यतीताकलासने नमः इति उदान मनि
ष्ठाविष्णुजलरसनारूपं नयत्वा न हत्वा नपां
स्थाने स्थापयेत् ततः ॐ ह्रां ब्रह्मणे पृथिव्य
धिपतये निवृत्तिकलासने नमः इति समा

श्री० नविहृत्य ब्रह्मपृथिवीं प्राणगंधगनव्याग
१६ मनपादान्तपृथिवीस्थाने स्थापयेत् ततः प्र
णवेण कुंडलिनीं स्वस्थाने स्थापयित्वा
16 नादशक्तिबिंदुशक्तिपरमशक्तीनां प्रणवे
ण स्वदेहे व्याप्तिं विभाव्य सोहमिति मंत्रे
ण ब्रह्मरंध्रस्थपरमात्मनः सकाशात्कुंडलि
नीजीवात्मानं च संहृतवर्णवर्णाधिदेवता
सहितमाज्ञाचक्रादिषु तत्तद्वर्णवर्णाधिदे
वताः स्थापयन् हृदयकमलमानीय तत्रै
व जीवात्मानं स्थापयित्वा कुंडलिनीं सुषु
म्णामार्गेणामूलाधारकादिचक्रेषु तत्तद्वर्ण
वर्णाधिदेवताः स्थापयन्मूलाधारे स्थाप
येत् ततः स्वशरीरं निरस्तसकलकलुषं दे
वताराधनयोग्यं विभाव्य प्राणप्रतिष्ठां कुर्या
त् ॐ अस्य श्रीप्राणप्रतिष्ठामंत्रस्य श्रीब्रह्म
विष्णुशिवा ऋषयः ऋग्यजुः सामानि छं
दांसि पराप्राणशक्तिर्देवता आं बीजं ह्रीं शक्ति
ः क्रों कीलकं मम श्रीप्राणप्राणप्रतिष्ठार्थे ज श्री
पे विनियोगः इति कृतांजलिः स्वत्वान्यसेत् ॐ
श्रीब्रह्मविष्णुशिवेभ्यः ऋषिभ्यो नमः शिरसि
ऋग्यजुः सामच्छंदोभ्यो नमो मुखे पराप्राण
शक्तिदेवतायै नमो हृदि आं बीजाय नमो गुह्ये
ह्रीं शक्तये नमः पादयोः क्रों कीलकाय नमः ना
भौ ममप्र

नं. २३५

नं.२३५

